# CBSE Test Paper 02
## Ch-7 सौहार्दं प्रकृतेः शोभा

1. **अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत।**

   (वनस्य दृश्यम् समीपे एवैका नदी अपि वहति।) एकः सिंहः सुखेन विश्राम्यते तदैव एकः वानरः आगत्यत तस्य पुच्छ धुनोति। क्रुद्धः सिंहः तं प्रहर्तुमिच्छति परं वानरस्तु कुर्दित्वा वृक्षमारूढः। तदैव अन्यस्मात् वृक्षात् अपरः वानरः सिंहस्य कर्णमाकृष्य पुनः वृक्षोपरि आरोहति एवमेव वानराः वारं वारं सिंह तुदन्ति। क्रुद्धः सिंहः इतस्ततः धावति, गर्जति पर किमपि कर्तुमसमर्थः एव तिष्ठति। वानराः हसन्ति वृक्षोपरि च विविधाः पक्षिणः अपि सिंहस्य एतादृशीं दशां दृष्ट्वा हर्षमिश्रितं कलरवं कुर्वन्ति। निद्राभङ्गदुःखेन वनराजः सन्नपि तुच्छजीवैः आत्मनः एतादृश्या दुरवस्थया श्रान्तः सर्वजन्तून् दृष्ट्वा पृच्छति-

   I. **एकपदेन उत्तरत-**
      i. कस्य समीपे एका नदी वहति?
      ii. एकः सिंहः कथम् विश्राम्यते?
   II. **पूर्णवाक्येन उत्तरत-**
      i. क्रुद्धः सिंहः किम् करोति?
   III. **भाषिककार्यम्-**
      i. 'तुदन्ति' इति क्रियापदस्य कर्तृपदं किम्?
         (क) वारं-वारम्
         (ख) सिंहम्
         (ग) वानराः
         (घ) पक्षी
      ii. ‘पक्षिणः' इति कर्तृपदस्य क्रियापदं किम्?
         (क) हर्षमिश्रितम्
         (ख) सिहस्य
         (ग) कलरवं
         (घ) कुर्वन्ति
      iii. 'क्रुद्धः सिंहः' अनयोः पदयोः विशेष्यपदं किम्?
         (क) इतस्ततः
         (ख) क्रुद्धः
         (ग) सिंहः
         (घ) धावति

2. **अधोलिखितश्लोकानाम् अन्वयं मञ्जूषायाः उचित पदं चित्वा पूरयत्।**

**मञ्जूषा-** कृतान्तो, पार्थिवरूपेण, सदा, जन्तून्, वसन्तसमये, काकः, पिकः, भेदः

i. यो न रक्षति वित्रस्तान् पीड्यमानान्परैः सदा।
   जन्तून् पार्थिवरूपेण स कृतान्तो न संशयः।।
   **अन्वयः-** यः (i)________ वित्रस्तान् परैः (ii)__________ पीड्यमानान् (iii)__________ न रक्षति स (iv)_________ न संशयः।

ii. काकः कृष्णः पिकः कृष्णः को भेदः पिककाकयोः।
   वसन्तसमये प्राप्ते काकः काकः पिकः पिकः।।
   **अन्वयः-** काकः कृष्ण (i)_________ कृष्णः को (ii)__________ पिककाकयोः (iii)_________ प्राप्ते काकः (iv)_________ पिकः पिकः।

3. **अधोलिखितानि वाक्यानि घटनाक्रमानुसारेण योजयत-**

i. सिंहः क्रोधेन गर्जति अहम् वनराजः अस्मि्।
ii. बकः कथयति अहम् अविचलः ध्यानमग्नः अस्तः अहम् योग्यः।
iii. वानरः कथयति राजा तु रक्षकः भवति परं भवान् तू भक्षकः।
iv. सिंहस्य दुर्वस्थाम् दृष्ट्वा सर्वे जीवाः हसन्ति।
v. मयूरः कथयति मम पिच्छानामपूर्वं सौन्दर्यम् अतः अहमेव योग्यः।
vi. पिकः कथयति अहम् मधुभाषिणी अतः अहमेव योग्यः।
vii. ततः काकं प्रवेशं कृत्वा कथयति अहमेव योग्यः।
viii. गजः कथयति अहं विशालकायः बलशाली पराक्रमी अतः अहम् योग्यः अस्मि।

4. **स्थूलपदमाधृत्य प्रश्ननिर्माणं कुरुत-**

i. बकः **वन्यजन्तूनां** प्रति रक्षोपायान् चिन्तयति।
ii. सिंहः **वनानराभ्याम्** स्वरक्षायाम् असमर्थः आसीत्।
iii. गजः **वन्यपशून्** तुदन्तं शुण्डेन पोथयित्वा मारयति।
iv. सर्वे **प्रकृतिमातरं** प्रणमन्ति।

5. **स्थूलपदमाधृत्य प्रश्ननिर्माणं कुरुत-**

i. बकः मीनान् **छलेन** अधिगृत्य भक्षयति।
ii. बकः **वराकान्** मीनान् भक्षयति।
iii. मयूरस्य नृत्यं **प्रकृतेः** आराधना।
iv. वानरः आत्मनं **वनराजपदाय** योग्यः मन्यते।

**CBSE Test Paper 02**

**Ch-7 सौहार्दं प्रकृतेः शोभा**

## Answer

1. I. (i) वनस्य
      (ii) सुखेन
   II. (i) क्रुद्धः सिंहः इस्ततः धावति, गर्जति परं किमापि कर्तुम् स मर्थः एवं न तिष्ठति।
   III. (i) (ग) वानराः
      (ii) (घ) कुर्वन्ति
      (iii) (ग) सिहः
2. I. (i) पार्थिवरूपेण, (ii) सदा, (iii) जन्तून्, (iv) कृतान्तो
   II. (i) पिकः, (ii) भेदः, (iii) वसन्तसमये, (iv) काकः
3. i. सिंहस्य दुर्वस्थाम् दृष्ट्वा सर्वे जीवाः हसन्ति।
   ii. सिंहः क्रोधेन गर्जति अहम् वनराजः अस्म्।
   iii. वानरः कथयति राजा तु रक्षकः भवति परं भवान् तू भक्षकः।
   iv. ततः काकं प्रवेशं कृत्वा कथयति अहमेव योग्यः।
   v. पिकः कथयति अहम् मधुभाषिणी अतः अहमेव योग्यः।
   vi. गजः कथयति अहं विशालकायः बलशाली पराक्रमी अतः अहम् योग्यः अस्मि।
   vii. बकः कथयति अहम् अविचलः ध्यानमग्नः अतः अहम् योग्यः।
   viii. मयूरः कथयति मम पिच्छानामपूर्वं सौन्दर्यम् अतः अहमेव योग्यः।

4. i. केषाम्, ii. काभ्याम्, iii. कान्, iv. काम्

5. i. केन, ii. कीदृशान्, iii. कस्याः, iv. कस्मै/किमर्थम्